International Journal of Sanskrit Research 2019; 5(4): 203-206

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(4): 203-206
© 2019 IJSR
www.anantaajournal.com
Received: 16-05-2019
Accepted: 18-06-2019

**जया कुण्डु**
Ph.D. Scholar,
Department of Sanskrit,
West Bengal, India

Correspondence
**जया कुण्डु**
Ph.D. Scholar,
Department of Sanskrit,
West Bengal, India

# ऋग्वेदप्रातिशाख्यार्थबोधे उवटभाष्यस्योपयोगिता

**जया कुण्डु**

**उपोद्घातः**

विश्वसाहित्यस्य प्राचीनतमो ग्रन्थः वेदः। भारतीयसंस्कृते परिचयज्ञानार्थं वेदानुशीलनस्य अपरिहार्यत्वमवश्यमेव स्वीकार्यम्। वेदाङ्गज्ञानव्यतिरेकेण पदार्थज्ञानं न सम्भवेत्। यतः साङ्गत्वेन वेदाध्यायनं ब्रह्मलोके महीयते -

छन्दः पादौ नु वेदस्य हस्तौ कल्पो'थ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।
शिक्षा घ्राणं नु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्येव ब्रह्मलोके महीयते।।

वेदकालीतसमाजे लिपिव्यवहारः प्रचलितो तासीत्। गुरुमुखात् श्रुत्वा शिष्याः वेदमन्त्रग्रहणं तदध्ययनं च अकुर्वन्। ब्राह्मणकालात् परं यदा लौकिकसंस्कृतस्य विकाशः वहुलतया प्रसारश्च दृश्यते तदा वैदिकसंकृतभाषाविषये जनानां ज्ञानं क्रमह्रासमानं जातम्। तदावस्थां वर्णास्वरमात्रासन्धिच्छन्दःसु विशिष्ठनियमाभावात् वेदमन्त्राणां शुद्धोच्चारणं दुरुहमभवत्। तदावश्यकतापूरणाय भारतवर्षे प्राचीनतमवैज्ञानिकध्वन्यध्ययन-परम्परायाः प्रारम्भः अभवत्। तद्वेदाङ्गशास्त्रस्य नाम 'शिक्षा' इति। शिक्षायाः प्राचीनतमरूपं प्रातिशाख्यमिति मन्यते ।

**प्रातिशाख्यस्य संज्ञा**

'शाखां शाखां प्रतिशाखम्, प्रतिशाखम् भवमिति प्रातिशाख्यम्'। 'अव्ययीभावाश्च' (पा.4.3.59) इति सूत्रेण ञ्य- प्रत्ययेन प्रातिशाख्यपदं सिद्धम्। पाणिनीयगणपाठस्य पारिमुखादिगणे (4.3.58) 'प्रातिशाख्य' इति शब्दो दृश्यते। निरूक्तस्य दुर्गाचार्यवृत्तौ (1.17) एवमुक्तम् - 'शाखेव श्खायः',

'शाखादिभ्यो यः' (पा.5.3.103) इति इवार्थे यः। शाख्यं शाख्यं प्रति प्रतिशाख्यं। 'अव्ययं विभक्ति....' (पा. 2.1.6) इत्यादिना अव्ययीभावः। तदधिकृत्य कृतं प्रातिशाख्यम्। 'अधिकृत्य कृते ग्रन्थे...' (पा.4.3.87) इत्यार्थे शेशिको'ण् (प्रतिशख्य + अण् = प्रातिशाख्यम्) इति।

**प्रातिशाख्यानां संख्या**

प्रातिशाख्यसंज्ञातः एतद् बोद्धुशक्यते यत् - वेदस्य सर्वासु शाखासु तत्तत्शाखानुसारं प्रातिशाख्यं विद्यते। महाभाष्ये चतुर्वेदसंहितायाः 1130 संख्यकाः शाखाः उल्लिखिताः। तदनुसृत्य सहस्राधिकसंख्यकानां प्रातिशाख्यानां विद्यमातत्वमङ्गीकरणीयम्। किन्तु अधुना अधिकांशप्रातिशाख्यग्रन्थानां विलोपो जातः कालविपर्ययात्। अधुना यानि प्रातिशाख्यानि प्राप्यते तानि -

1) ऋग्वेदस्य शाकलशाखायां शौनकविरचितम् 'ऋग्वेदप्रातिशाख्यम्'
2) तैतिरीयप्रातिशाख्यं 'कृष्णयजुःप्रातिशाख्यम्' वा
3) वररुचि-कात्यायनप्रणीतं 'वाजसनेयिप्रातिशाख्यं' 'शुक्लयजुःवेदप्रातिशाख्याम्' वा
4) अथर्ववेदस्य पैपल्लादशाखासम्वन्धिनं 'अथर्ववेदप्रातिशाख्यम्'
5) अथर्ववेदस्य शौनकशाखासम्वन्धिनी 'शौनकीया चतुरध्ययिका'
6) सामवेदस्य कौथमीशाखासम्वन्धिनं शाकटायनविरचितम् 'ऋक्तन्त्रम्'
7) शौरिसृनुविरचितः 'लघुऋक्तन्त्रसंग्रहः'
8) पुष्पर्षिकृतं 'पुष्पसूत्रं' सामप्रातिशाख्यं वा
9) औदव्रजिविरचितं 'सामतन्त्रम्'
10)'मैत्रायणी-प्रातिशाख्यम्'
11)'गौतमप्रतिशाख्यम्'
12)'आश्वलायनप्रातिशाख्यम्'
13)'चारायणीयप्रातिशाख्यम्'
14)'सत्यमुग्रिप्रातिशाख्यमिति'

एतेषु अन्तिमग्रन्थपञ्चकमिदानीं दुःप्राप्यम्। प्राचीनता-प्रामाणिकता-विषय-विस्तारादीन् परिलक्ष्य एतत् वक्तुं शक्यते यत्, ऋग्वेदप्रातिशाख्यं प्रातिशाख्यान्तरेभ्यः अन्यतरं शीर्षस्थानीयश्च।

**ऋग्वेदप्रातिशाख्यस्य परिचयः**

ऋग्वेदप्रातिशाख्ये शाकलशाखान्तर्गतायाः शैशिरीयोपशाखायाः ध्वनिवैशिष्ट्यं साङ्गोपाङ्गत्वेन विविच्यते। अत्र विषयाः सूत्रकारेण प्रतिपादिता। अस्य ग्रन्थस्य रचयिता शौनकः। तत्र अष्टादशपटलानि सन्ति। अध्यायानुसारेण तेषां क्रमः-

1) संज्ञापरिभाषापटलम्
2) संहितापटलम्
3) स्वरपटलम्
4) सन्धिपटलम्
5) नतिपटलम्
6) ध्यन्यागमपटलम्
7-9) प्लुतिपटलम्
10) क्रमपटलम्
11) क्रमहेतुपटलम्
12) सीमापटलम्
13) शिक्षापटलम्
14) उच्चारणदोषपटलम्
15) ओङ्कारपटलम्
16-18) छन्दःपटलम्।

**ऋग्वेदप्रातिशाख्यस्य भाष्यानि**

ऋग्वेदप्रातिशाख्यमवलम्ब्य प्रायः टीकाचतुष्टयमिदानीं प्राप्यने -

1) पार्षदवृत्ति - अस्य मुद्रणमद्यपि न अभवन्। तत् केवलं हस्तलिप्याकारेण (Manuscript) अभिलेखागारेषु प्राप्यते।
2) विष्णुमित्रकृतवर्गद्वयवृत्तिः - ऋग्वेदप्रातिशाख्यस्य प्रारम्भिकेषु दशसंख्यकश्लोकेषु उवटभाष्यं न प्राप्यते। तस्मादेव विष्णुमित्रेण तत्कार्यं कृतम्। विष्णुमित्रस्य वृत्तिः 'वर्गद्वयवृत्ति' इति नाम्ना प्रसिद्धम्। श्लोकपञ्चकस्य एकत्र कथनं 'वर्ग' इति

परिभाषया परिस्फुट्यते। वर्गद्वयं इत्यक्ते दशसंख्यकश्लोकानामेकत्रसंग्रहः एव वोध्यते। अस्यां वृत्तौ विष्णुमित्रः स्वस्य कुलपरिचयं दत्तवान् -

'चम्पायां न्यवसत्पूर्वं वत्सानां कुलमृद्धिमत्।
यस्मिन्दिजवरा जाता वहवृचाः पारगोत्तमाः।
देवमित्र इति ख्यातस्मिन्ञ्जातो महामतिः।
स वै परिषदे श्रेष्टः सुतस्तस्य महामत्मः।
नाम्ना तु विष्णुमित्रः स कुमार इति शस्यते।
तेनेयं योजिता वृत्तिः संक्षिप्ता पार्षदे स्फुटा'- इति।

आचार्यबलदेवोपाध्यायेनोक्तं यत् - ऋग्वेदप्रतिशाख्योपरि (अष्टादशपटलसमेतः) विष्णुमित्रकृतवृत्तिः डेकन-महाविद्यालयस्य अभिलेखागारे हस्तलेखरूपेण प्राप्यते। तत्र तट्टीकायाः नाम 'ऋज्वर्था' इति (वैदिक साहित्य ओर संस्कृति, पृष्टा - 301)

3) पशुपतिनाथशास्त्रिकृतभाष्यम्-
   उवटभाष्यमवलम्ब्य कृतं भाष्यमिदं कलिकातातः (1927) प्रकाशितम्।
4) उवटभाष्यम् (पार्षदव्याख्या) - ऋग्वेदप्रातिशाख्योपरि याः व्याख्याः प्राप्यते, तासु पार्षदव्याख्या श्रेष्टा। तद्व्याख्या उवटेन कृता। अस्य लेख्यस्यावतारणा तद्विषयमवलम्ब्य एव विहिता।

इदानीम् ऋग्वेदप्रातिशाख्यार्थाववोधे किम् उपयोगित्वम् उवटभाष्यस्य तत् सामर्थ्यानुसारं वर्ण्यते - महद्भाष्याणां गुणाः उवटभाष्ये प्राप्यन्ते। व्याकरणशास्त्रे यादृशं पतञ्जलिकृतमहाभाष्यं, मीमांसासूत्रमवलम्ब्य च यथा शावरभाष्यं, तथैव ऋग्वेदप्रातिशाख्यमवलम्ब्य कृतस्य उवटभाष्यस्य गरिमा। व्याख्यानावसरे कतिपयेषु स्थलेषु तस्य सूक्ष्मदृष्टेः परिचयः प्राप्यते।

यथा - प्रथमपटले 'एते स्वराः' (ऋ.प्रा.1.3) इति सूत्रस्य भाष्ये यदा शौनकगृहीतलौकिकवर्णमालाविषये सन्देहः आपतितः, तदा सूत्रकारपक्षमवलम्ब्य भाष्याकारः सामाम्नायद्वयस्यास्तित्वसम्वावनां प्रकटीतवान्। 'आचार्यप्रवृत्त्या क्रोमो'न्यथानुमीयते। तद्दथा - ऋकारादयो दशः नामिनः स्वराः इति। यद्याकारात्परौ पठ्यते तदानीं दश नामिनः स्वराः सम्पद्यते।' तथा - 'संध्येष्वकारो'र्धमिकार उत्तरं युजोरुकारः' इति। यदि ए,ओ,ऐ,औ एवं पाठो भवति, तदानीं युजोरुत्तरमर्धकारः सम्पद्यते। तथा - 'यदि शकारात् पूर्वो हः पठ्यते - 'दुस्पृष्टं तु प्राग्घकाराच्चतुर्णाम्' अयं पाठक्रम उपपद्यते इति। सो'यमाचार्यप्रवृत्त्या पाठक्रमो'नुमीयमानो लौकिकवर्गसमाम्नायस्य द्विधा पाठं गमयति। अतो'यं लौकिको वर्णसमाम्नायस्य द्रष्टव्ये'। इति।

पुनश्च, प्रथमपटलस्य 'औकार आमन्त्रिजः प्रगृह्यः (ऋ.प्रा.1.68)' इति सूत्रभाष्ये य़दा अधिकारसूत्रवैशिष्ट्यविषये सन्देहः जायते, तदा उवटेन सम्यग्भावेन तत्समाधानं प्रदीयते।

प्रगृह्यसंज्ञायाः प्रयोजनम् - 'प्रकृत्येति करणादौ प्रगृह्याः' इति। एतच्च सूत्रं स्वार्थमभिधायोत्तरसूत्रेषु प्रगृह्यसंज्ञामधिकरोति। अतो'धिकारसूत्रमेवैतत्। ननु अधिकारसूत्रं परार्थं भवति, एतत्तु स्वार्थमभिधाय परार्थं भवति। अथ कथमधिकारसूत्रमेतदिति? नैष दोषः। गुणो'यं शास्त्रकृतो यदनेनैव सूत्रेण स्वार्थमभिधत्ते, अधिकारं च प्रकरोति। अतो'धिकारसूत्रमेवैतदिति। आह च -

'उभयार्था परार्थं वा सूत्रं स्यादधिकारिकम्।
संज्ञासूत्रं परार्थं स्यात् पारिभाषिकमेव च।।
परिभाषां च संज्ञां च कार्यकालां प्रचक्षते।
अधिकारः कृतः यत्र ततो'न्यत्र न गच्छति'।।....इति।

विषये'स्मिन् 'अपूर्वपदान्तगतश्च' (ऋ.प्र.1.70) इति सूत्रस्य प्रयोजनं विद्यते न वेति तदालोच्य उवटेन सूत्रस्यास्य प्रयोजनीयत्वम् उल्लिखितम् -

'पूर्वपदान्तगतश्च य ओकारो न भवति, स प्रगृह्यसंज्ञो भवति। पूर्वपदोत्तरपदव्यपदेशश्च समास एव भवति। अतो'यमर्थः पूर्वपदान्तस्यौकारस्य प्रगृह्यसंज्ञा न

भवति। "याँश्चो नु दाधृविर्भरध्यै", "एषो उषा अपूर्व्या" अपूर्वपदान्तगः इति किम्? यदहं गोपतिः स्याम्, कुवित्सु नो गविष्टये। ननु अननैव सूत्रेणधास्तनयोः सूत्रयोर्विषयः सूचितः। एवं तद्यधस्तनाभ्यामस्यैव सूत्रस्य प्रपञ्चः कृतः। ते वै विधयः संगृहीता येषां लक्षणप्रपञ्चश्च'।। इति।

'महः', 'तपः' इति पदद्वये विसर्जनीयः रिफित्संज्ञको न भवति। तत्कारणं दर्शयित्वा उवटः तस्य मतं सुष्टुभावेन् प्रकाशयति -

'यद्येवमर्थं पुरस्तादपवादः क्रियते, एवं तर्हि न कर्तव्यो'पवादः। तत्रैव वयं तथा व्याख्यास्यामो यथा विशेषणार्थतानयोः पदयोर्भविष्यति। तद्यथा - अपस्कः इत्यत्र "तावदप" इत्येतस्य पदस्य करित्येतस्मिन्पदे परभूत उपाचरितं वक्ष्यति- करं कृतं कृधि करत्वरित्यपि परेषु- अतो'प इत्येतस्य विशेषणार्थत्वमवगम्यते। आचार्यश्च- अपस्कः इत्यत्र सकारं विसर्जनीयस्य दर्शयिष्यति। अतो'स्मिन्पदे विशेषणार्थता स्थिता। तथा - अवर्महः इत्यर्थ -

- वरावरावरिति चेकपादे व्यपपूर्वाणि इत्यनेनावरित्येतस्य पदस्य रेफिसंज्ञा न प्राप्नोति। अतः "महः" इत्येतत्पदं विशेषणार्थं पठितमिति गम्यते। संधौ च रेफदर्शनात् - अवर्महः इति'।
- भाष्यकारः कतिपयविषये तस्य स्वकीयमतानि प्रदर्शितवान्। यथा -

1) भाष्यकारः कदापि सूत्रकारस्य विरूद्धवचनं न प्रदर्शितवान्। यत्र यत्र सूत्रकारवचने सन्देहो जायते, तदा युक्तिमाध्यमेन तत् खण्डं कृत्वा सूत्रकारमतप्रतिष्ठां च करोति भाष्यकारः।
2) सूत्रस्य अवबोधाय सदा भाष्यकारः तत्प्रसङ्गसम्बंधानि उदाहरणानि प्रकाशयति।
3) स्वभाष्ये कतिपयगुरुत्वपूर्णविषयानामवतारणां करोति भाष्यकारः। यथा - प्रतिशाख्यस्य प्रयोजनम्, अधिकारसूत्रस्य स्वरूपम्, विवृते स्वरूपम्, कम्पस्य स्वरूपम्, स्वरभक्तेः स्वरूपम्, यमानां स्वरूपम् च इत्यादीनि।

ग्रन्थसूची


1. Rgveda-Pratisakhya. Ed. Virendra Kumar Verma. Benaras Hindu University, Varanasi, 1937.
2. RPT. Chawkhamba Sanskrit Pratishtan, Varanasi, 1999.
3. Rgveda-Pratisakhya. Ed, Taraknath Adhikari, Sanskrit Book Depot, Kolkata, 2006.
4. Dutta PK. Panini and Pratisakhaya, Sanakrit Pustok Bhander. Caicutta, 1994.